## ORIENTAL INSTITUTE, BARODA.

Acc. No. 20955. Subject योग.

Name पातञ्जलयोगसूत्र.

Author पतञ्जलि.

Age

Extent 1-9. Fls. Gr. 150.

Language Sanskrit. Script Devanāgari.

Source - श्रीनरहरिशास्त्रीपेण्डसे. डभोई. Gift.

॥ ॥अथपातंजलयोगसूत्रप्रारंभः॥ ॥

ORIENTAL INSTITUTE
BARODA (INDIA)

योग· श्रीगणेशायनमः॥ ॥ॐ हरिः ॐ ३ देहार्धयोगः शिवयोः सश्रेयांसितनो
तुवः दुःखापमपियत्स्मृत्याजनः कैवल्यमश्नुते १ त्रिविधान्यपिदुःखानि
३ यदनुस्मरणान्नृणां॥ प्रयांतिसद्योविलयंतंस्तुमः शिवमद्वयं २ पतंज
लिमुनेरुक्तिः काप्यपूर्वाजयत्यसौ॥ पुंप्रकृत्योर्वियोगोपियोगइत्यु
दितोयया ३ अथयोगसूत्रं अथयोगानुशासनं १ योगश्चित्तवृत्ति
निरोधः २ तदाद्रष्टुः स्वरूपेवस्थानं ३ वृत्तिसारूप्यमितरत्र ४ वृत्त
यः पंचतय्यः क्लिष्टाअक्लिष्टा ५ प्रमाणविपर्ययविकल्पनिद्रास्मृ ३
तयः ६ प्रत्यक्षानुमानागमाः प्रमाणानि ७ विपर्ययोमिथ्याज्ञा
नमतद्रूपप्रतिष्ठं ८ शब्दज्ञानानुपातीवस्तुशून्योविकल्पः ९ अभाव

प्रत्ययालंबनावृत्तिर्निद्रा १० अनुभूतविषयासंप्रमोषः स्मृतिः ११
अभ्यासवैराग्याभ्यांतन्निरोधः १२ तत्रस्थितौयत्नोभ्यासः १३ सतु
दीर्घकालनैरंतर्यसत्कारासेवितोदृढभूमिः १४ दृष्टानुश्रविकवि
षयवितृष्णस्यवशीकारसंज्ञावैराग्यं १५ तत्परंपुरुषख्यातेर्गुण
वैतृष्ण्यं १६ वितर्कविचारानंदास्मितानुगमात्संप्रज्ञातः १७ विरा
मप्रत्ययाभ्यासपूर्वः संस्कारशेषोन्यः १८ भवप्रत्ययोविदेहप्रकृ
तिलयानां १९ श्रद्धावीर्यस्मृतिसमाधिप्रज्ञापूर्वकइतरेषां २० ती
व्रसंवेगानामासन्नः २१ मृदुमध्याधिमात्रत्वात्ततोपिविशेषः २२ ई
श्वरप्रणिधानाद्वा २३ क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशे

ORIENTAL INSTITUTE
BARODA (INDIA)

योग- षईश्वरः २४ तत्रनिरतिशयंसार्वज्ञबीजं २५ सपूर्वेषामपिगुरुःकाल
नानवछेदात् २६ तस्यवाचकःप्रणवः २७ तज्जपस्तदर्थभावनं २८ त
२ तःप्रत्यक्चेतनाधिगमोप्यंतरायाभावश्च २९ व्याधिस्त्यानसंशयप्र
मादालस्याविरतिभ्रांतिदर्शनालब्धभूमिकत्वानवस्थितत्वानिचि
त्तविक्षेपास्तेंतरायाः ३० दुःखदौर्मनस्यांगमेजयत्वश्वासप्रश्वासा
विक्षेपसहभुवः ३१ तत्प्रतिषेधार्थमेकतत्वाभ्यासः ३२ मैत्रीकरुणा
मुदितोपेक्षाणांसुखदुःखपुण्यापुण्यविषयाणांभावनातश्चित्त २
प्रसादनं ३३ प्रछर्दनविविधारणाभ्यांवाप्राणस्यविषयवतीवाप्र
वृत्तिरुत्पन्नामनसस्थितिनिबंधिनी ३५ विशोकावाज्योतिष्मती ३६

वीतरागविषयंवाचित्तं ३७ स्वप्ननिद्राज्ञानालंबनंवा ३८ यथाभिम
तध्यानाद्वा ३९ परमाणुपरममहत्वांतोस्यवशीकारः ४० क्षीणवृत्ते
रभिजातस्येवमणेर्ग्रहीतृग्रहणग्राह्येषुतत्स्थतदंजनतासमाप
त्तिः ४१ शब्दार्थज्ञानविकल्पैः संकीर्णासवितर्का ४२ स्मृतिपरि
शुद्धौस्वरूपशून्येवार्थमात्रनिर्भासानिर्वितर्का ४३ एतयैवस
विचारानिर्विचाराचसूक्ष्मविषयाव्याख्याता ४४ सूक्ष्मविषय
त्वंचालिंगपर्यवसानं ४५ ताएवसबीजाःसमाधिः ४६ निर्वि
चारवैशारद्येअध्यात्मप्रसादः ४७ ऋतंभरातत्रप्रज्ञा ४८ श्रुतानु
मानप्रज्ञाभ्यामन्यविषयाविशेषार्थत्वात् ४९ तज्जसंस्कारोन्यसं

ORIENTAL INSTITUTE
BARODA (INDIA)

स्कारप्रतिबंधी ५० तस्यापिनिरोधे सर्वनिरोधान्निर्बीजःसमाधिः ५१
इतिपतंजलियोगसूत्रस्यप्रथमःपादः १ ॐ तपःस्वाध्यायेश्वरप्रणि
२ धानानिक्रियायोगः १ समाधिभावनार्थःक्लेशतनूकरणार्थश्च २
अविद्यास्मितारागद्वेषाभिनिवेशाःपंचक्लेशाः ३ अविद्याक्षेत्रमुत्तरे
षांप्रसुप्ततनुविच्छिन्नोदाराणां ४ अनित्याशुचिदुःखानात्मसुनि
त्यशुचिसुखात्मख्यातिरविद्या ५ दृग्दर्शनशक्त्योरेकात्मतेवा
स्मिता ६ सुखानुशयीरागः ७ दुःखानुशयीद्वेषः ८ स्वरसवा ३
हीविदुषोपितथारूढोभिनिवेशः ९ तेप्रतिप्रसवहेयाःसूक्ष्माः १०
ध्यानहेयास्तद्वृत्तयः ११ क्लेशमूलःकर्माशयोदृष्टादृष्टजन्मवेदनी

यः १२ सतिमूलेतद्विपाकोजात्यायुर्भोगाः १३ तेह्लादपरितापफलाः
पुण्यापुण्यहेतुत्वात् १४ परिणामतापसंस्कारदुःखैर्गुणवृत्तिविरो
धाच्चदुःखमेवसर्वंविवेकिनः १५ हेयंदुःखमनागतं १६ द्रष्टृदृश्य
योःसंयोगोहेयहेतुः प्रकाशक्रियास्थितिशीलंभूतेंद्रियात्म
कंभोगापवर्गार्थंदृश्यं १८ विशेषाविशेषलिंगमात्रालिंगानिगु
णपर्वाणि १९ द्रष्टादृशिमात्रःशुद्धोपिप्रत्ययानुपश्यः तदर्थएवदृ
श्यस्यात्मा २१ कृतार्थंप्रतिनष्टमप्यनष्टंतदन्यसाधारणत्वात्
स्वस्वामिशक्त्योःस्वरूपोपलब्धिहेतुःसंयोगः २३ तस्यहेतुरवि
द्या २४ तदभावात्संयोगाभावोहानंतद्दृशेःकैवल्यं २५ विवेकख्या

ORIENTAL INSTITUTE
BARODA (INDIA)

योग. तिरविप्लवाहानोपायः २६ तस्यसप्तधाप्रांतभूमिःप्रज्ञा २७ योगांगा
नामनुष्ठानादशुद्धिक्षयेज्ञानदीप्तिराविवेकख्यातेः २८ यमनियमास
४ नप्राणायामप्रत्याहारधारणाध्यानसमाधयोष्टावंगानि २९ अहिं
सासत्यास्तेयब्रह्मचर्यापरिग्रहायमाः ३० एतेजातिदेशकालसम
यानवछिन्नाः सार्वभौमामहाव्रतं ३१ शौचसंतोषतपःस्वाध्याये
श्वरप्रणिधानानिनियमाः वितर्कबाधनेप्रतिपक्षभावनं ३३ वितर्का
हिंसादयः कृतकारितानुमोदितालोभक्रोधमोहपूर्वकामृदुमध्या ४
धिमात्रादुःखाज्ञानानंतफलाइतिप्रतिपक्षभावनं ३४ अहिंसा
प्रतिष्ठायांतत्संनिधौवैरत्यागः ३५ सत्यप्रतिष्ठायांक्रियाफलाश्र

दुर्भावौनिरोधक्षणचित्तान्वयोनिरोधपरिणामः ९ तस्यप्रशांतवाहि
तासंस्कारात् १० सर्वार्थतैकाग्रतयोःक्षयोदयौचित्तस्यसमाधिपरि
णामः ११ शांतोदितौतुल्यप्रत्ययौचित्तस्यैकाग्रतापरिणामः १२ एतेन
भूतेंद्रियेषुधर्मलक्षणावस्थापरिणामाव्याख्याताः १३ शांतोदिताव्य
पदेश्यधर्मानुपातीधर्मी १४ क्रमान्यत्वंपरिणामान्यत्वेहेतुः १५ प
रिणामत्रयसंयमादतीतानागतज्ञानं १६ शब्दार्थप्रत्ययानामित
रेतराध्यासात्संकरस्तविभागसंयमात्सर्वभूतरुतज्ञानं १७ सं
स्कारसाक्षात्करणात्पूर्वजातिज्ञानं १८ प्रत्ययस्यपरचित्तज्ञा
नं १९ नतत्सालंबनंतस्याविषयीभूतत्वात् २० कायरूपसंयमात

ORIENTAL INSTITUTE
BARODA (INDIA)

योग. ह्यशक्तिस्तंभेचक्षुःप्रकाशासंयोगेंतर्धानं २१ सोपक्रमंनिरुपक्रमं
चकर्मतत्संयमादपरांतज्ञानमरिष्टेभ्योवा २२ मैत्र्यादिषुबलानि २३ ब
६५ लेषुहस्तिबलादीनि २४ प्रवृत्त्यालोकन्यासात्सूक्ष्मव्यवहितविप्रकृ
ष्टज्ञानं २५ भुवनज्ञानंसूर्येसंयमात् २६ चंद्रेताराव्यूहज्ञानं २७
ध्रुवेतद्गतिज्ञानं २८ नाभिचक्रेव्यूहेकायेज्ञानं २९ कंठकूपेक्षुत्पिपा
साधिनिवृत्तिः ३० कूर्मनाड्यांस्थैर्यं ३१ मूर्धज्योतिषिसिद्धदर्शनं ३२
प्रातिभाद्वासर्वं सर्वाणिमित्तानपेक्षं ३३ हृदयेचित्तसंवित् ३४ सत्व ६
पुरुषयोरत्यंतासंकीर्णयोःप्रत्ययाविशेषात्भोगःपरार्थात्स्वार्थसं
यमात्पुरुषज्ञानं ३५ ततःप्रातिभश्रावणवेदनादर्शास्वादवार्ताजा

यत्वं ३६ अस्तेयप्रतिष्ठायां सर्वरत्नोपस्थानं ३७ ब्रह्मचर्यप्रतिष्ठायां
वीर्यलाभः ३८ अपरिग्रहस्थैर्ये जन्मकथंतासंबोधः ३९ शौचात्स्वांगजु
गुप्सापरैरसंसर्गः ४० सत्वशुद्धिसौमनस्यैकाग्र्येंद्रियजयात्मदर्श
नयोग्यत्वानि च ४१ संतोषादनुत्तमःसुखलाभः ४२ कायेंद्रियसिद्धि
रशुद्धिक्षयात्तपसः ४३ स्वाध्यायादिष्टदेवतासंप्रयोगः ४४ समा
धिसिद्धिरीश्वरप्रणिधानात् ४५ स्थिरसुखमासनं ४६ प्रयत्नशै
थिल्यानंतसमापत्तिभ्यां ४७ ततो द्वंद्वानभिघातः ४८ तस्मिन्सति
श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः ४९ सतु बाह्याभ्यंतरस्तं
भवृत्तिर्देशकालसंख्याभिः परिदृष्टो दीर्घसूक्ष्मः ५० बाह्याभ्यंतर

योग- विषयाक्षेपीचतुर्थः ५१ ततःक्षीयतेप्रकाशावरणं ५२ धारणासुचयो
ग्यतामनसः ५३ स्वस्वविषयासंप्रयोगेचित्तस्यस्वरूपानुकारइवेंद्रि
५ याणांप्रत्याहारः ५४ ततःपरमावश्यतेंद्रियाणां ।। ५५ ।। ।। इतिपातं
जलयोगसूत्रेसमाप्तोयंद्वितीयःपादः ।। २ ।। ।। ॐ यत्पादपद्मस्म
रणादणिमादिविभूतयः भवंतिभविनांपुंसुभाष्यकारःसभूतये १
देशबंधश्चित्तस्यधारणा १ तत्रप्रत्ययैकतानताध्यानं २ तदेवा
र्थमात्रनिर्भासंस्वरूपशून्यमिवसमाधिः ३ त्रयमेकत्रसंयमः ४ ५
तज्जयात्प्रज्ञालोकः ५ तस्यभूमिषुविनियोगः ६ त्रयमंतरंगंपूर्वेभ्यः
तदपिबहिरंगंनिर्बीजस्य ७ व्युत्थाननिरोधसंस्कारयोरभिभवप्रा

यंते ३६ ते समाधावुपसर्गा व्युत्थाने सिद्धयः ३७ बंधकारणशैथिल्या
त्प्रचारसंवेदनाच्चित्तस्य परशरीरावेशः ३८ उदानजयाज्जलपंककं
कंटकादिष्वसंग उत्क्रांतिश्च ३९ समानजयात्प्रज्वलनं ४० श्रोत्रा
काशयोः संबंधसंयमाद्दिव्यं श्रोत्रं ४१ कायाकाशयोः संबंधसं
यमाल्लघुतूलसमापत्तेश्चाकाशगमनं ४२ बहिरकल्पिता चित्त
वृत्तिर्महाविदेहा ततः प्रकाशावरणक्षयः ४३ स्थूलस्वरूपसू
क्ष्मान्वयार्थवत्त्वसंयमाद्भूतजयः ४४ ततोऽणिमादिप्रादुर्भावः का
यसंपत्तद्धर्मानभिघातश्च ४५ रूपलावण्यबलवज्रसंहननानि का
यसंपत् ४६ ग्रहणस्वरूपास्मितान्वयार्थवत्त्वसंयमादिंद्रिय

ORIENTAL INSTITUTE
BARODA (INDIA)

 जयः ४७ ततोमनोजवित्वंविकरणभावःप्रधानजयश्च ४८ सत्वपुरुषा
न्यताख्यातिमात्रस्यसर्वभावाधिष्ठातृत्वंसर्वज्ञातृत्वंच ४९ तद्वैराग्या
 दपिदोषबीजक्षयेकैवल्यं ५० स्थान्युपनिमंत्रेणसंगस्मयाकरणं
पुनरनिष्टप्रसंगात् क्षणतत्क्रमयोःसंयमाद्विवेकजंज्ञानं ५२ जा
तिलक्षणदेशैरन्यतानवछेदात्तुल्ययोस्ततःप्रतिपत्तिः ५३ तारकं
सर्वविषयंसर्वथाविषयक्रमंचेतिविवेकजंज्ञानं ५४ सत्वपुरुष
योःशुद्धिसाम्येकैवल्यमिति॥ ५५॥ ॥इतिपातंजलयोगसूत्रेस 
भाष्येविभूतिपादस्तृतीयः॥३॥ ॥ ॥ॐ यदाज्ञेयवैकैवल्यंवि
नोपायैःप्रजायतेतमेकमजमीशानंचिदानंदमयंस्तुमः १ जन्मौ

षधिमंत्रतपःसमाधिजाःसिद्धयः १ जात्यंतरपरिणामःप्रकृत्यापूरा
त् २ निमित्तमप्रयोजकंप्रकृतीनांवरणभेदस्तुततःक्षेत्रिकवत् ३
निर्माणचित्तान्यस्मितामात्रात् ४ प्रवृत्तिभेदेप्रयोजकंचित्तमेकम
नेकेषां ५ तत्रध्यानजमनाशयं ६ कर्माशुक्लाकृष्णंयोगिनस्त्रिवि
धमितरेषां ७ ततस्तद्विपाकानुगुणानामेवाभिव्यक्तिर्वासनानां ८
जातिदेशकालव्यवहितानामप्यानंतर्यंस्मृतिसंस्कारयोरेकरूप
त्वात् ९ तासामनादित्वंचाशिषोनित्यत्वात् १० हेतुफलाश्रया
लंबनैःसंगृहीतत्वादेषामभावेतदभावः ११ अतीतानागतंस्व
रूपतोस्त्यध्वभेदाद्धर्माणां १२ तेव्यक्तसूक्ष्मागुणात्मानः १३ परि

ORIENTAL INSTITUTE
BARODA (INDIA)

यो॰सू॰ णामैकत्वाद्वस्तुतत्वं १४ वस्तुसाम्ये चित्तभेदात्तयोर्विविक्तः पंथाः १५
तदुपरागापेक्षित्वाच्चित्तस्य वस्तुज्ञाताज्ञातं १६ सदाज्ञाताः चित्त
८ वृत्तयस्तत्प्रभोः पुरुषस्यापरिणामात् १७ नतत्स्वाभासं दृश्य
त्वात् १८ एकसमये चोभयानवधारणं १९ चित्तांतरदृश्ये बुद्धि
बुद्धेरतिप्रसंगः स्मृतिसंकरश्च २० चित्तेरप्रतिसंक्रमायास्तदा
कारापत्तौ स्वबुद्धिसंवेदनं २१ द्रष्टृदृश्योपरक्तं चित्तं सर्वार्थं २२
तदसंख्येयवासनाभिश्चित्रमपिपरार्थं संहत्यकारित्वात् २३ ८
विशेषदर्शिन आत्मभावभावनाविनिवृत्तिः २४ तदाविवेकनि
म्नंकैवल्यप्राग्भारंचित्तं २५ तच्छिद्रेषुप्रत्ययांतराणि संस्कारे

भ्यः २६ हानमेषांक्लेशवदुक्तं २७ प्रसंख्यानेप्यकुसीदस्य सर्वथावि
वेकख्यातेर्धर्ममेघः समाधि २८ ततःक्लेशकर्मविनिवृत्तिः २९ त
दासर्वावरणमलापेतस्यज्ञानस्यानंत्याज्ज्ञेयमल्पं ३० कृतार्थानां
परिणामक्रमसमाप्तिर्गुणानां ३१ क्षणप्रतियोगीपरिणामाप
रांतनिर्ग्राह्यःक्रमः ३२ पुरुषार्थशून्यानांप्रतिप्रसवः कैवल्यस्वरू
पप्रतिष्ठावाचितिशक्तिरिति ॥ ३३ ॥ ॥ इतिश्रीपातंजलयोग
सूत्रेकैवल्यपादश्चतुर्थः ॥ ४ ॥ ॥ श्रीशंकरार्पणमस्तु ॥ ॥

ORIENTAL INSTITUTE
BARODA (INDIA)

॥ इतिपतंजलयोग सूत्रसमाप्तः॥ ॥